Click here to go back

# Shani Mantra - Hindi

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ शनि मंत्रः

ओं अस्य श्री शनैश्चर महामंत्रस्य ऊरुमित्र ऋषिः। उष्णिक्छंदः। शनैश्चरो देवता। शनैश्चर प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) शनैश्चराय अंगुष्ठाभ्यां नमः। मंदगतये तर्जनीभ्यां नमः। अधोक्षजाय मध्यमाभ्यां नमः। सौरये अनामिकाभ्यां नमः। अभयंकराय कनिष्ठिकाभ्यां नमः। ऊर्ध्वरोम्णे करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) शनैश्चराय हृदयाय नमः। मंदगतये शिरसे स्वाहा। अधोक्षजाय शिखायै वषट्। सौरये कवचाय हुं। अभयंकराय नेत्रत्रयाय वौषट्। ऊर्ध्वरोम्णे अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) नीलांबरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्। चतुर्भुज सूर्यसुतः प्रशांतस्सुदास्तुमह्यं वरदः प्रसन्नः॥ (लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ शन्नोदेवी रभिष्टय आपो भवंतु पीतये। शंयोरभिस्रवंतु नः॥ इति शनि मंत्रः॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back